HUMP-BACKED, *a.* कुब्जः -ब्जा -ब्जं, कुब्जकः -का -कं, गडुः -डुः -डु, गडुरः -रा -रं, गडुलः -ला -लं, वक्रपृष्ठः -ष्ठा -ष्ठं, उच्चस्कन्धः -न्धा -न्धं.

HUNCH, *s.* (A hump) गडुः *m.*, स्यगुः *m.*—(A lump) पिण्डः, गराडका, घनः.

*To* HUNCH, *v. a.* अरत्निना तड् (c. 10. ताडयति -यितुं) or आहन् (c. 2. -हन्ति -न्तुं).

HUNCH-BACKED, *a.* गडुपृष्ठः -ष्ठा -ष्ठं. *See* HUMP-BACKED.

HUNDRED, *a.* शतं, शतसंख्यकः -का -कं, एकशतसंख्यकः -का -कं, शतकः -का -कं, दशतिः *f.* The word शतं may be used with the nom. pl. or gen. pl.; as, 'a hundred ancestors,' शतं पितरः or शतं पितॄणां; or in comp., as, 'a hundred years,' वर्षशतं, शतवर्षं; 'a hundred and fifty,' सार्द्धशतं; 'a hundred thousand,' लक्षं -क्षा; 'a hundred millions,' अर्बुदं; 'a hundred years old,' शतायूः -यूः -युः (स्).

HUNDRED, *s.* शतं, शतकः, दशतिः *f.*; 'by hundreds,' शतशस्.

HUNDREDTH, *a.* शततमः -मी -मं, शतः -ती -तं.

HUNGER, *s.* क्षुधा, क्षुत् *f.* (ध्), बुभुक्षा, जिघत्सा, अन्नलिप्सा, आहारलिप्सा, अशनाया -यितं, अन्नायी, क्षारिका; 'hunger and thirst,' क्षुत्पिपासा or -से *f.* du.

*To* HUNGER, *v. n.* क्षुध् (c. 4. क्षुध्यति, क्षोद्धुं), भुज् in des. (बुभुक्षति -ते -क्षितुं), घस् in des. (जिघत्सति -त्सितुं), अशन (nom. अशनायति -यितुं), अन्नं or आहारं लभ् in des. (लिप्सते -प्सितुं); 'to hunger after righteousness,' धर्म्माय क्षुध्.

HUNGER-BIT, HUNGER-BITTEN, *a.* क्षुधार्त्तः -र्त्ता -र्त्तं, क्षुत्पीडितः -ता -तं.

HUNGERED, *a.* क्षुधितः -ता -तं, बुभुक्षितः -ता -तं, क्षुधार्त्तः -र्त्ता -र्त्तं.

HUNGERLY, *a.* अन्नार्थी -र्थिनी -र्थि (न्), भोजनार्थी &c., आहारार्थी &c.

HUNGER-STARVED, *a.* क्षुदवसन्नः -न्ना -न्नं, क्षुधावसन्नः -न्ना -न्नं, क्षुधार्दितः -ता -तं.

HUNGRY, *a.* क्षुधार्त्तः -र्त्ता -र्त्तं, क्षुधितः -ता -तं, क्षुत्पीडितः -ता -तं, क्षुधापीडितः -ता -तं, क्षुधातुरः -रा -रं, बुभुक्षितः -ता -तं, बुभुक्षुः -क्षुः -क्षु, जिघत्सुः -त्सुः -त्सु, आहारार्थी -र्थिनी -र्थि (न्), अन्नार्थी &c., अन्नलिप्सुः -प्सुः -प्सु, आहारलिप्सुः -प्सुः -प्सु, अशनायितः -ता -तं, क्षुधाव्याकुलः -ला -लं; 'hungry and thirsty,' क्षुत्पिपासितः -ता -तं, क्षुत्तृष्णोपपीडितः -ता -तं.—(Lean) कृशः -शा -शं, अपुष्टः -ष्टा -ष्टं, विपुष्टः -ष्टा -ष्टं.

HUNKS, *s.* कृपणः, कदर्य्यः, धनलोभी *m.* (न्), मितम्पचः.

*To* HUNT, *v. a.* and *n.* (Chase) मृग् (c. 10. मृगयते -यितुं), मृगयां कृ, आखिद् (c. 1. -खेटति -टितुं), परिकल् (c. 10. -कालयति -यितुं).—(Pursue, follow after, search for) अनुसृ (c. 1. -सरति -सर्त्तुं), अनुधाव् (c. 1. -धावति -वितुं), पश्चाद्धाव्, अनुवृत् (c. 1. -वर्त्तते -र्त्तितुं), पश्चाद्वृत्, अन्विष् (c. 4. -इष्यति -एषितुं).

HUNT, *s.* (Chase) मृगया, मृगव्यं, खेटः -टं, आखेटः, आखोदनं, आच्छोदनं, पापर्द्धिः *f.*, पराधिः *f.*—(Pursuit, search) अनुसरणं, अनुधावनं, अन्वेषणं -णा, पर्य्येषणा, मृगणं, मार्गणं.

HUNTED, *p. p.* मृगितः -ता -तं, अनुसृतः -ता -तं, अनुधावितः -ता -तं, आखेटितः -ता -तं, अन्विष्टः -ष्टा -ष्टं, अन्वेषितः -ता -तं.

HUNTER, *s.* (One who pursues wild animals) व्याधः, मृगयुः *m.*, लुब्धकः, मृगवधाजीवः, मृगजीवनः, आखेटकः, मृगादिपशुहन्ता *m.* (न्तृ), सौकरिकः, अन्त्रः, खट्टिकः; 'with nets,' जालिकः.—(Horse) मृगयाश्वः.

HUNTING, *s.* मृगया, मृगव्यं, खेटः -टं, आखेटः, आखोदनं, आच्छोदनं, पापर्द्धिः *f.*, पराधिः *f.*; 'hunting-knife,' कर्त्तरिका; 'hunting-dog,' आखेटकः श्वा *m.* (न्), मृगयाकुक्कुरः; 'hunting appointments,' मृगयावेशः.—(Pursuit, search) अनुसरणं, अनुधावनं, अन्वेषणं -णा, पर्य्येषणा, मृगणं, मार्गणं.

HUNTING-HORN, *s.* मृगयाशङ्खः, मृगव्यशङ्खः, व्याधवादितं शृङ्गं or विषाणं.

HUNTRESS, *s.* व्याधी *f.*, व्याधस्त्री, आखेटकी, मृगयाकारिणी.

HUNTSMAN, *s.* मृगयाकारी *m.* (न्), मृगव्यकारी *m.*, मृगयुः *m.*, आखेटकः.

HUNTSMANSHIP, *s.* मृगयाविद्या, मृगव्यविद्या, आखेटविद्या.

HURDLE, *s.* काष्ठशलाकानिर्म्मितम् अवरोधकं or आवरणं, स्तम्भकरः.

HURDY-GURDY, *s.* कर्कशशब्दः सतन्त्रीवाद्यविशेषः.

*To* HURL, *v. a.* क्षिप् (c. 6. क्षिपति, क्षेप्तुं), प्रक्षिप्, अस् (c. 4. अस्यति, असितुं), प्रास्, ईर् (c. 10. ईरयति, -यितुं), उदीर्, समीर्, मुच् (c. 6. मुञ्चति, मोक्तुं), प्रमुच्, सृज् (c. 6. सृजति, स्रष्टुं), व्यवसृज्, पत् (c. 10. पातयति -यितुं), प्रहृ (c. 1. -हरति -ते -हर्त्तुं), प्रेष् (c. 10. प्रेषयति -यितुं, rt. इष्), उद्गुर् (c. 6. -गुरते -रितुं); 'to hurl stones,' शिलाप्रहरणं कृ; 'is hurled down,' निपात्यते.

HURL, *s.* (Throw) क्षेपः -पणं, असनं, पातनं.—(Tumult) तुमुलं, कोलाहलः, विप्लवः, डिम्बः.

HURLED, *p. p.* क्षिप्तः -प्ता -प्तं, प्रक्षिप्तः -प्ता -प्तं, अस्तः -स्ता -स्तं, प्रास्तः -स्ता -स्तं, पातितः -ता -तं, ईरितः -ता -तं, विसृष्टः -ष्टा -ष्टं.

HURLER, *s.* क्षेपकः, क्षेप्ता *m.* (प्तृ), असिता *m.* (तृ), प्रासकः.

HURLING, *s.* क्षेपणं, असनं, पातनं; 'of stones,' शिलाप्रहरणं.

HURLY-BURLY, *s.* कोलाहलः, हलहलाशब्दः, कालकोलः -लकः, तुमुलं.

HURRAH, *exclam.* जयशब्दः, प्रशंसाशब्दः, आनन्दशब्दः.

HURRICANE, *s.* चक्रवातः, प्रभञ्जनः, उत्पातवातः, अतिवातः, वात्या, वात्यावेगः, चण्डवातः, प्रचण्डवायुः *m.*, वाताली, वातरूषः, वातगुल्मः, झञ्झावातः, झञ्झा, जवानिलः, भूमिः *m.*, निर्घातः, पवनाघातः.

HURRIED, *a.* त्वरितः -ता -तं; 'spoken fast,' त्वरितोदितः -ता -तं, निरस्तः -स्ता -स्तं.

HURRIEDLY, *adv.* त्वरितं, सत्वरं, द्रुतं, शीघ्रं, अविलम्बितं, सरभसं.

*To* HURRY, *v. a.* त्वर् (c. 10. त्वरयति -यितुं), सन्त्वर्.—(Hurry along, drive, impel) कृष् (c. 1. कर्षति, क्रष्टुं), समाकृष्, प्रेर् (c. 10. -ईरयति -यितुं), प्रणुद् (c. 6. -णुदति -णोत्तुं).

*To* HURRY, *v. n.* त्वर् (c. 1. त्वरते -रितुं), सन्त्वर्, अतित्वर्, शीघ्र (nom. शीघ्रायते), सत्वरं or शीघ्रं गम् (c. 1. गच्छति, गन्तुं) or चर् (c. 1. चरति -रितुं).

HURRY, *s.* त्वरा, सम्भ्रमः, संवेगः, आवेगः, वेगः, रभसः, क्षिप्रकारिता, त्वरितगतिः *f.*, आशुगमनं, शीघ्रता.—(Bustle) सम्भ्रमः, आकुलत्वं, व्यग्रता, व्यस्तता; 'in a hurry,' त्वरितः -ता -तं, सम्भ्रमी -मिणी -मि (न्), सम्भ्रान्तः -न्ता -न्तं, आकुलः -ला -लं.

HURRY-SKURRY, *adv.* ससम्भ्रमं, सरभसं, सावेगं व्याकुलं, सम्भ्रमेण.

*To* HURT, *v. a.* हिंस् (c. 7. हिनस्ति, c. 1. हिंसति -सितुं), विहिंस्, उपहिंस्, आहिंस्, क्षतं कृ, क्षतिं कृ, क्षण् (c. 8. क्षणोति -णितुं), परिक्षण्, अपकृ, द्रोहं कृ, अर्द् (c. 10. अर्दयति -यितुं), समर्द्, पीड् (c. 10. पीडयति -यितुं), व्यथ् (c. 10. व्यथयति -यितुं), रिष् (c. 1. रेषति, c. 4. रिष्यति, रेषितुं, रेष्टुं), क्षि (c. 5. क्षिणोति, c. 1. क्षयति, क्षेतुं), हन् (c. 2. हन्ति -न्तुं), विहन्, उपहन्, तुद् (c. 6. तुदति, तोत्तुं), नश् (c. 10. नाशयति -यितुं), दुष् (c. 10. दूषयति -यितुं), द्रुह् (c. 4. द्रुह्यति, द्रोग्धुं); 'you hurt me by your sharp words,' तुदसि मे मर्म्माणि वाक्शरैः.

HURT, *s.* क्षतं, क्षतिः *f.*, परिक्षतं, हिंसा -सनं, अपकारः, अपकृतं, द्रोहः, अभिद्रोहः, अपायः, खदः, उपक्षयः, पीडा, व्यथा, आघातः, बाधः, नाशः, दोषः, विहेठः -ठनं, हानिः *f.*, रिष्टं.

HURT, *p. p.* क्षतः -ता -तं, परिक्षतः -ता -तं, विक्षतः -ता -तं, हिंसितः -ता -तं, विहिंसितः -ता -तं, अपकृतः -ता -तं, कृतापकारः -रा -रं, अर्दितः